जालकं, क्ली, (जल संवरणे + भावे घञ् । जालेन ईषदावरणेन कायति प्रकाशते इति । कै + कः । जाल + स्वार्थे कन् वा ।) अस्फुटकलिका । इति भरतः ॥ (यथा, मेघदूते । ६६ ।

"तासुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ॥")

कुष्माण्डादिक्षुद्रफलम् । इति सारसुन्दरी ॥ तत्पर्य्यायः । क्षारकः २ । इत्यमरः । २ । ४ । १६ ॥ कोरकः । दम्भः । कुलायः । आनायः । इति मेदिनी । के, ६२ ॥ (यथा, सुश्रुते । उत्तरतन्त्रे ७ अध्याये ।

"दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते ।
मक्षिकान् मशकान् केशान् जालकानि च पश्यति ॥")

समूहः । इति शब्दरत्नावली ॥ (यथा, शाकुन्तले प्रथमाङ्के ।

"वद्धं कर्णशिरीषरोधि वदने घर्म्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्य्याकुला मूर्द्धजाः ॥"

वंशलौहादिनिर्म्मितजालाकृतिद्रव्यविशेषः । यथा, पञ्चतन्त्रे । ३ । १०१ ।

"ततो यष्टिं शलाकाश्च जालकं पञ्जरं तथा ।
बभञ्ज लुब्धको दीनां कपोतीञ्च मुमोच ताम् ॥")

जालकं, क्ली क्ली, (जल संवरणे + भावे घञ् । जालेन आवरणेन कायति प्रकाशते इति । कै + कः ।) मोचकफलम् । इति मेदिनी ॥ के, ६२ ॥

जालकः, पुं, (जालेन वंशलौहादिनिर्म्मितजालाकृतिद्रव्यविशेषेण कायतीति । कै + कः ।) गवाक्षः । इति हेमचन्द्रः । ४ । ७८ ॥

जालकारकः, पुं, (जालं करोतीति । कृ + ण्वुल् । जालस्य कारको वा ।) मर्कटकः । इति हेमचन्द्रः । ४ । २७६ ॥ जालकर्त्तरि, त्रि ॥

जालकिनी, स्त्री, (जालकं लोमसमूहस्तदस्त्यस्या इति । "अत इनिठनौ ।" ५।२।११५। इति इनिस्ततो ङीप् ।) मेषी । इति हेमचन्द्रः ।४।३।४३॥

जालगर्द्दभः, पुं, रोगविशेषः । तस्य लक्षणं यथा,

"विसर्पवत् सर्पति यः शोथस्तनुरपाकवान् ।
दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्द्दभः ॥"

अपाकवान् ईषत्पाकवान् । पित्तकृतत्वेन सर्व्वथा पाकाभावस्यायुक्तत्वात् । अयममिवात इति ख्यातः ॥ * ॥ अथ विकृतेन्द्रवृद्धागर्द्दभिकाजालगर्द्दभानां चिकित्सा ।

"विकृतामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम् ।
पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक् ।
पाके तु रोपयेदाज्यैः पक्वैर्म्मधुरभेषजैः ॥"

इति भावप्रकाशः ॥

जालगोणिका, स्त्री, (जालवत् गोण्या छिद्रवस्त्रेण कायतीति । कै + कः । ततो ह्रस्वः ।) दधिमन्थनभाण्डविशेषः । तत्पर्य्यायः । कण्ठालः २ । इति शब्दरत्नावली ॥

जालन्धरः, पुं, त्रिगर्त्तदेशः । इति हेमचन्द्रः । ४ । १४ ॥ (देशोऽयं पीठस्थानानामन्यतमः । अत्र भगवती विश्वमुखीमूर्त्त्या विराजते । यथा, देवीभागवते । ७ । ३० । ७६ ।

"जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते ॥"

जालन्धरोऽभिजन एषामिति । अण् ।) तद्देशस्थे पुं भूम्नि । (दैत्यविशेषः । यथा, काशीखण्डे । २१ । १०६ ।

"पुरा जालन्धरं दैत्यं ममापि परिकम्पनम् ।
पादाङ्गुष्ठाग्ररेखोत्थं चक्रं सृष्ट्वा हरोऽहरत् ॥"

ऋषिविशेषः । इति व्याकरणम् ॥)

जालपात् [द्] पुं, (जालमिव पादौ यस्य ।) हंसः । इति त्रिकाण्डशेषः ॥ (यथाह सुश्रुतः । १४६ ।

"टिट्टिभं जालपादञ्च कोकिलं कुक्कुटं तथा ॥")

जालप्राया, स्त्री, (जालस्य प्रायो बाहुल्यं यत्र ।) अङ्गरक्षिणी । इति हेमचन्द्रः । ३ । ४३३ ॥ लौहार साँजोया इति भाषा ॥

जालवर्व्वूरकः, पुं, (जालाकारो वर्व्वूरकः । शाकपार्थिवादिवत्समासः ।) वर्व्वूरवृक्षविशेषः । तत्पर्य्यायः । छत्राकः २ स्थूलकण्टकः ३ सूक्ष्मशाखः ४ तनुच्छायः ५ रन्ध्रकण्टः ६ । अस्य गुणाः । रूक्षत्वम् । वातामयकफनाशित्वम् । पित्तदाहकारित्वम् । कषायत्वम् । उष्णत्वञ्च । इति राजनिर्घण्टः ॥

जालिकः, पुं, (जालेन जीवतीति । जाल + "वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठन् । यद्वा, जालेन चरतीति । "पर्पादिभ्यः ष्ठन् ।" ४ । ४ । १० । इति ठन् ।) कैवर्त्तः । इति त्रिकाण्डशेषः ॥ वागुरिकः । जालेन मृगबन्धनकर्त्ता इत्यमरः ।२ ।१० ।१४ ॥ मर्कटकः । इति हेमचन्द्रः । ४ । २७७ ॥ (ऐन्द्रजालिकः । इति व्याकरणम् ॥)

जालिकः, त्रि, (जालेन जीवतीति । जाल + ठन् ।) ग्रामजाली । जालोपजीवी । इति मेदिनी । के, ६४ ॥

जालिका, स्त्री, (जालं जालवदाकृतिरस्ति अस्याः । जाल + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) वस्त्रविशेषः । गिरिसारः । (जलमेवेति स्वार्थे अण् । ततो जालं सलिलं उत्पत्तित्वेनास्त्यस्या इति ठन् ।) जलौका । विधवा । भटानामङ्गरचिताङ्गरक्षिणी । इति मेदिनी । के, ६४ ॥

जालिनी, स्त्री, (जालं चित्रकर्म्मवस्तुसमूहो विद्यतेऽस्यामिति । इनिस्ततो ङीप् ।) चित्रशाला । इति हेमचन्द्रः । ४ । ६५ ॥ (जालं आनायसदृशद्रव्यं विद्यतेऽस्या इति ।) कोशातकी । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्याया भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"धामार्गवः पीतपुष्पो जालिनी कृतवेधना ।
राजकोशातकी चेति तथोक्ता राजिमत्फला ॥"

घोषातकी । इति रत्नमाला ॥ प्रमेहरोगिणः पीडकाविशेषः । यथा, सुश्रुते निदानस्थाने ६ अध्याये । "तत्र वसामेदोभ्यामभिपन्नशरीरस्य त्रिभिर्दोषैरनुगतधातोः प्रमेहिणो दश पीडका जायन्ते । तद्यथा, शराविका सर्षपिका कच्छपिका जालिनी विनता पुत्त्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति ।"

"जालिनी तीव्रदाहा तु मांसजालसमावृता ॥")

जाली, स्त्री, (जालं जालाकृतिरस्ति अस्याः अच् ततो गौरादित्वात् ङीष् ।) ज्योत्स्नी । इत्यमरः । २ । ४ । ११८ ॥ झिङ्गा । इति ख्याता । पटोलः । इति राजनिर्घण्टः ॥

जाल्मः, त्रि, (जालयति दूरीकरोति हिताहितज्ञानमिति । जल + णिच् + बाहुलकात् मः ।) पामरः । (यदुक्तम् ।

"चरणं विश्राम्यतां जाल्म ! स्कन्धं ते यदि बाधति ।
न तथा बाधते स्कन्धं यथा बाधति बाधते ॥")

क्रूरः । असमीक्ष्यकारी । इति मेदिनी । मे, १३ ॥ (यथा, माघे । १५ । ३३ ।

"त्वयि पूजनं जगति जाल्म !
कृतमिदमपाकृते गुणैः ।
हासकरमघटते नितरां
शिरसीव कङ्कतमपेतमूर्द्धजे ॥")

जावकं, क्ली, (जसति शुष्यति सन्ध्यादिकमिति । जस + ण्वुल् । पृषोदरादित्वात् सस्य वत्वम् ।) कालीयनामगन्धद्रव्यम् । इत्यमरटीकासारसुन्दरी ॥

जाहकः, पुं, घोङ्गः । घोंघ इति भाषा । मार्ज्जारः । खट्टा । कारुखिट्टका । इति मेदिनी । के, ६२ ॥ विलेशयजन्तुविशेषः । तत्पर्य्यायः । गात्रसङ्कोची २ मण्डली ३ बहुरूपकः ४ कामरूपी ५ विरूपी ६ विलवासः ७ । इति राजनिर्घण्टः ॥

जाह्नवी, स्त्री, (जह्नोरपत्यं स्त्री । जह्नु + अण् + ङीप् ।) गङ्गा । इति हेमचन्द्रः । ४ । १४७ ॥ एतन्नामकारणं यथा,—

"जानुद्वारा पुरा दत्ता जह्नुः संपीय कोपतः ।
तस्य कन्यास्वरूपा च जाह्नवी तेन कीर्त्तिता ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ * ॥

तस्यां तिथिविशेषे स्नानफलं यथा,—

"सामान्यदिवसस्नानसङ्कल्पं शृणु सुन्दरि ! ।
पुण्यं दशगुणञ्चैव मौषलस्नानतः परम् ॥
ततस्त्रिंशद्गुणं पुण्यं रविसंक्रमणे दिने ।
अमायाञ्चापि तत्तुल्यं द्विगुणं दक्षिणायने ॥
ततो दशगुणं पुण्यं नराणामुत्तरायणे ।
चातुर्म्मास्यां पौर्णमास्यामनन्तं पुण्यमेव च ॥
अक्षयायाञ्च तत्तुल्यं नैतद्वेदनिरूपितम् ।
असंख्यपुण्यफलदमेतेषु स्नानदानकम् ।
सामान्यदिवसस्नानात् दानात् शतगुणं भवेत् ॥
मन्वन्तरायां देवेशि ! युगाद्यायां तथैव च ।
माघस्य सितसप्तम्यां भीष्माष्टम्यां तथैव च ॥
ततोऽपि द्विगुणं पुण्यं नन्दायां भवदुर्ल्लभे ! ।
दशहरादशम्याञ्च युगाद्यादि समं फलम् ॥
नन्दासमञ्च वारुण्यां महत्पूर्व्वे चतुर्गुणम् ।
ततश्चतुर्गुणं पुण्यं द्विमहत्पूर्व्वके सति ॥
पुण्यं कोटिगुणञ्चैव सामान्यस्नानतो हि यत् ।